# Mrityunjaya Sahasranama Stotram

# મૃત્યુઞ્જયસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Mrityunjaya Sahasranama Stotram

File name : mRityunjayasahasra.itx

Category : sahasranAma, shiva, stotra

Location : doc_shiva

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar, PSA Easwaran

Description-comments : rudrayAmale tantre devIrahasye. See corresponsing sahasranAmAvaliH

Latest update : February 24, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 7, 2021

*sanskritdocuments.org*

# મૃત્યુઞ્જયસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીભૈરવ ઉવાચ ।
અધુના શ‍ૃણુ દેવેશિ સહસ્રાખ્યસ્તવોત્તમમ્ ।
મહામૃત્યુઞ્જયસ્યાસ્ય સારાત્ સારોત્તમોત્તમમ્ ॥

અસ્ય શ્રીમહામૃત્યુઞ્જસહસ્રનામસ્તોત્ર મન્ત્રસ્ય,
ભૈરવ ઋષિઃ, ઉષ્ણિક્ છન્દઃ, શ્રીમહામૃત્યુઞ્જયો દેવતા,
ૐ બીજં, જું શક્તિઃ, સઃ કીલકં, પુરુષાર્થસિદ્ધયે
સહસ્રનામ પાઠે વિનિયોગઃ ।
ધ્યાનમ્ -
ઉદ્યચ્ચન્દ્રસમાનદીપ્તિમમૃતાનન્દૈકહેતું શિવં
ૐ જું સઃ ભુવનૈકસૃષ્ટિપ્ર(વિ)લયોદ્ભૂત્યેકરક્ષાકરમ્ ।
શ્રીમત્તારદશાર્ણમણ્ડિતતનું ત્ર્યક્ષં દ્વિબાહું પરં
શ્રીમૃત્યુઞ્જયમીડ્યવિક્રમગુણૈઃ પૂર્ણં હૃદબ્જે ભજે ॥

અથ સ્તોત્રમ્ -
ૐ જું સઃ હૌં મહાદેવો મન્ત્રજ્ઞો માનદાયકઃ । (મન્ત્રેશો મન્ત્રનાયકઃ)
માની મનોરમાઙ્ગશ્ચ મનસ્વી માનવર્ધનઃ ॥ ૧॥

માયાકર્તા મલ્લરૂપો મલ્લમારાન્તકો મુનિઃ ।
મહેશ્વરો મહામાન્યો મન્ત્રી મન્ત્રિજનપ્રિયઃ ॥ ૨॥

મારુતો મરુતાં શ્રેષ્ઠો માસિકઃ પક્ષિકોઽમૃતઃ ।
માતઙ્ગકો મત્તચિત્તો મત્તચિન્મત્તભાવનઃ ॥ ૩॥

માનવેષ્ટપ્રદો મેષો મેનકાપતિવલ્લભઃ ।
માનકાયો મધુસ્તેયી મારયુક્તો જિતેન્દ્રિયઃ ॥ ૪॥

જયો વિજયદો જેતા જયેશો જયવલ્લભઃ ।

ડામરેશો વિરૂપાક્ષો વિશ્વભોક્તા વિભાવસુઃ ॥ ૫॥

વિશ્વેશો વિશ્વનાથશ્ચ વિશ્વસૂર્વિશ્વનાયકઃ । (વિશ્વતાતશ્ચ)
વિનેતા વિનયી વાદી વાન્તદો વાક્પ્રદો વટુઃ ॥ ૬॥

સ્થૂલઃ સૂક્ષ્મોઽચલો લોલો લોલજિહ્વઃ કરાલકઃ । (સૂક્ષ્મશ્ચલો)
વિરાધેયો વિરાગીનો વિલાસી લાસ્યલાલસઃ ॥ ૭॥

લોલાક્ષો લોલધીર્ધર્મી ધનદો ધનદાર્ચિતઃ ।
ધની ધ્યેયોઽપ્યધ્યેયશ્ચ ધર્મ્યો ધર્મમયોદયઃ ॥ ૮॥

દયાવાન્ દેવજનકો દેવસેવ્યો દયાપતિઃ ।
ડુલિચક્ષુર્દરીવાસો દમ્ભી દેવમયાત્મકઃ ॥ ૯॥

કુરૂપઃ કીર્તિદઃ કાન્તઃ ક્લીબોઽક્લીબાત્મકઃ કુજઃ ।
બુધો વિદ્યામયઃ કામી કામકાલાન્ધકાન્તકઃ ॥ ૧૦॥

જીવો જીવપ્રદઃ શુક્રઃ શુદ્ધઃ શર્મપ્રદોઽનઘઃ ।
શનૈશ્ચરો વેગગતિર્વાચાલો રાહુરવ્યયઃ ॥ ૧૧॥

કેતુઃ કારાપતિઃ કાલઃ સૂર્યોઽમિતપરાક્રમઃ ।
ચન્દ્રો રુદ્રપતિઃ ભાસ્વાન્ ભાગ્યદો ભર્ગરૂપભૃત્ ॥ ૧૨॥

ક્રૂરો ધૂર્તો વિયોગી ચ સઙ્ગી ગઙ્ગાધરો ગજઃ ।
ગજાનનપ્રિયો ગીતો ગાની સ્નાનાર્ચનપ્રિયઃ ॥ ૧૩॥

પરમઃ પીવરાઙ્ગશ્ચ પાર્વતીવલ્લભો મહાન્ ।
પરાત્મકો વિરાડ્ધૌમ્યઃ વાનરોઽમિતકર્મકૃત્ ॥ ૧૪॥

ચિદાનન્દી ચારુરૂપો ગારુડો ગરુડપ્રિયઃ ।
નન્દીશ્વરો નયો નાગો નાગાલઙ્કારમણ્ડિતઃ ॥ ૧૫॥

નાગહારો મહાનાગો ગોધરો ગોપતિસ્તપઃ ।
ત્રિલોચનસ્ત્રિલોકેશસ્ત્રિમૂર્તિસ્ત્રિપુરાન્તકઃ ॥ ૧૬॥

ત્રિધામયો લોકમયો લોકૈકવ્યસનાપહઃ ।
વ્યસની તોષિતઃ શમ્ભુસ્ત્રિધારૂપસ્ત્રિવર્ણભાક્ ॥ ૧૭॥

ત્રિજ્યોતિસ્ત્રિપુરીનાથસ્ત્રિધાશાન્તસ્ત્રિધાગતિઃ ।
ત્રિધાગુણી વિશ્વકર્તા વિશ્વભર્તા અધિપૂરુષઃ ॥ ૧૮॥ (ત્રિપૂરુષઃ)

ઉમેશો વાસુકિર્વીરો વૈનતેયો વિચારકૃત્ ।
વિવેકાક્ષો વિશાલાક્ષોઽવિધિર્વિધિરનુત્તમઃ ॥ ૧૯॥

વિદ્યાનિધિઃ સરોજાક્ષો નિઃસ્મરઃ સ્મરનાશનઃ ।
સ્મૃતિમાન્ સ્મૃતિદઃ સ્માર્તો બ્રહ્મા બ્રહ્મવિદાં વરઃ ॥ ૨૦॥

બ્રાહ્મવ્રતી બ્રહ્મચારી ચતુરશ્ચતુરાનનઃ ।
ચલાચલોઽચલગતિર્વેગી વીરાધિપો વરઃ ॥ ૨૧॥

સર્વવાસઃ સર્વગતિઃ સર્વમાન્યઃ સનાતનઃ ।
સર્વવ્યાપી સર્વરૂપઃ સાગરશ્ચ સમેશ્વરઃ ॥ ૨૨॥

સમનેત્રઃ સમદ્યુતિઃ સમકાયઃ સરોવરઃ ।
સરસ્વાન્ સત્યવાક્ સત્યઃ સત્યરૂપઃ સુધીઃ સુખી ॥ ૨૩॥

સ્વરાટ્ સત્યઃ સત્યમતી રુદ્રો રૌદ્રવપુર્વસુઃ ।
વસુમાન્ વસુધાનાથો વસુરૂપો વસુપ્રદઃ ॥ ૨૪॥

ઈશાનઃ સર્વદેવાનામીશાનઃ સર્વબોધિનામ્ ।
ઈશોઽવશેષોઽવયવી શેષશાયી શ્રિયઃ પતિઃ ॥ ૨૫॥

ઇન્દ્રશ્ચન્દ્રાવતંસી ચ ચરાચરજગત્સ્થિતિઃ ।
સ્થિરઃ સ્થાણુરણુઃ પીનઃ પીનવક્ષાઃ પરાત્પરઃ ॥ ૨૬॥

પીનરૂપો જટાધારી જટાજૂટસમાકુલઃ ।
પશુરૂપઃ પશુપતિઃ પશુજ્ઞાની પયોનિધિઃ ॥ ૨૭॥

વેદ્યો વૈદ્યો વેદમયો વિધિજ્ઞો વિધિમાન્ મૃડઃ ।
શૂલી શુભઙ્કરઃ શોભ્યઃ શુભકર્તા શચીપતિઃ ॥ ૨૮॥

શશાઙ્કધવલઃ સ્વામી વજ્રી શઙ્ખી ગદાધરઃ ।
ચતુર્ભુજશ્ચાષ્ટભુજઃ સહસ્રભુજમણ્ડિતઃ ॥ ૨૯॥

સ્રુવહસ્તો દીર્ઘકેશો દીર્ઘો દમ્ભવિવર્જિતઃ ।
દેવો મહોદધિર્દિવ્યો દિવ્યકીર્તિર્દિવાકરઃ ॥ ૩૦॥

ઉગ્રરૂપ ઉગ્રપતિરુગ્રવક્ષાસ્તપોમયઃ ।
તપસ્વી જટિલસ્તાપી તાપહા તાપવર્જિતઃ ॥ ૩૧॥

હવિર્હરો હયપતિર્હયદો હરિમણ્ડિતઃ ।
હરિવાહી મહૌજસ્કો નિત્યો નિત્યાત્મકોઽનલઃ ॥ ૩૨॥

સમ્માની સંસૃતિર્હારી સર્ગી સન્નિધિરન્વયઃ ।
વિદ્યાધરો વિમાની ચ વૈમાનિકવરપ્રદઃ ॥ ૩૩॥

વાચસ્પતિર્વસાસારો વામાચારી બલન્ધરઃ ।
વાગ્ભવો વાસવો વાયુર્વાસનાબીજમણ્ડિતઃ ॥ ૩૪॥

વાસી કોલશ઼ૃતિર્દક્ષો દક્ષયજ્ઞવિનાશનઃ ।
દાક્ષો દૌર્ભાગ્યહા દૈત્યમર્દનો ભોગવર્ધનઃ ॥ ૩૫॥

ભોગી રોગહરો હેયો હારી હરિવિભૂષણઃ ।
બહુરૂપો બહુમતિર્બહુવિત્તો વિચક્ષણઃ ॥ ૩૬॥

નૃત્તકૃચ્ચિત્તસન્તોષો નૃત્તગીતવિશારદઃ ।
શરદ્વર્ણવિભૂષાઢ્યો ગલદગ્ધોઽઘનાશનઃ ॥ ૩૭॥

નાગી નાગમયોઽનન્તોઽનન્તરૂપઃ પિનાકભૃત્ ।
નટનો હાટકેશાનો વરીયાંશ્ચ વિવર્ણભૃત્ ॥ ૩૮॥

ઝાઙ્કારી ટઙ્કહસ્તશ્ચ પાશી શાર્ઙ્ગી શશિપ્રભઃ ।
સહસ્રરૂપો સમગુઃ સાધૂનામભયપ્રદઃ ॥ ૩૯॥

સાધુસેવ્યઃ સાધુગતિઃ સેવાફલપ્રદો વિભુઃ ।
સુમહા મદ્યપો મત્તો મત્તમૂર્તિઃ સુમન્તકઃ ॥ ૪૦॥

કીલી લીલાકરો લાન્તઃ ભવબન્ધૈકમોચનઃ ।
રોચિષ્ણુર્વિષ્ણુરચ્યુત અમૂર્તો નૂતનો નવઃ ॥ ૪૧॥

ન્યગ્રોધરૂપો ભયદો ભયહાઽભીતિધારણઃ ।
ધરણીધરસેવ્યશ્ચ ધરાધરસુતાપતિઃ ॥ ૪૨॥

ધરાધરોઽન્ધકરિપુર્વિજ્ઞાની મોહવર્જિતઃ ।
સ્થાણુકેશો જટી ગ્રામ્યો ગ્રામારામો રમાપ્રિયઃ ॥ ૪૩॥

પ્રિયકૃત્ પ્રિયરૂપશ્ચ વિપ્રયોગી પ્રતાપનઃ ।
પ્રભાકરઃ પ્રભાદીપ્તો મન્યુમાનવનીશ્વરઃ ॥ ૪૪॥

તીક્ષ્ણબાહુસ્તીક્ષ્ણકરસ્તીક્ષ્ણાંશુસ્તીક્ષ્ણલોચનઃ ।
તીક્ષ્ણચિત્તસ્ત્રયીરૂપસ્ત્રયીમૂર્તિસ્ત્રયીતનુઃ ॥ ૪૫॥

હવિર્ભુગ્ઘવિષાં જ્યોતિર્હાલાહલો હલીપતિઃ ।

હવિષ્મલ્લોચનો હાલામયો હરિતરૂપભૃત્ ॥ ૪૬॥

મ્રદિમાઽઽમ્રમયો વૃક્ષો હુતાશો હુતભુગ્ગુણી ।
ગુણજ્ઞો ગરુડો ગાનતત્પરો વિક્રમી ક્રમી ॥ ૪૭॥

ક્રમેશ્વરઃ ક્રમકરઃ ક્રમિકૃત્ ક્લાન્તમાનસઃ ।
મહાતેજા મહામારો મોહિતો મોહવલ્લભઃ ॥ ૪૮॥

મનસ્વી ત્રિદશો બાલો બાલાપતિરઘાપહઃ ।
બાલ્યો રિપુહરો હાર્યો ગવિર્ગવિમતોઽગુણઃ ॥ ૪૯॥

સગુણો વિત્તરાડ્વીર્યો વિરોચનો વિભાવસુઃ ।
માલામયો માધવશ્ચ વિકર્તનોઽવિકત્થનઃ ॥ ૫૦॥

માનકૃન્મુક્તિદોઽતુલ્યો મુખ્યઃ શત્રુભયઙ્કરઃ ।
હિરણ્યરેતાઃ સુભગઃ સતીનાથઃ સિરાપતિઃ ॥ ૫૧॥

મેઢ્રી મૈનાકભગિનીપતિરુત્તમરૂપભૃત્ ।
આદિત્યો દિતિજેશાનો દિતિપુત્રક્ષયઙ્કરઃ ॥ ૫૨॥

વસુદેવો મહાભાગ્યો વિશ્વાવસુર્વસુપ્રિયઃ ।
સમુદ્રોઽમિતતેજાશ્ચ ખગેન્દ્રો વિશિખી શિખી ॥ ૫૩॥

ગરુત્માન્ વજ્રહસ્તશ્ચ પૌલોમીનાથ ઈશ્વરઃ ।
યજ્ઞપેયો વાજપેયઃ શતક્રતુઃ શતાનનઃ ॥ ૫૪॥

પ્રતિષ્ઠસ્તીવ્રવિસ્રમ્ભી ગમ્ભીરો ભાવવર્ધનઃ ।
ગાયિષ્ઠો મધુરાલાપો મધુમત્તશ્ચ માધવઃ ॥ ૫૫॥

માયાત્મા ભોગિનાં ત્રાતા નાકિનામિષ્ટદાયકઃ ।
નાકેન્દ્રો જનકો જન્યઃ સ્તમ્ભનો રમ્ભનાશનઃ ॥ ૫૬॥

શઙ્કર ઈશ્વર ઈશઃ શર્વરીપતિશેખરઃ ।
લિઙ્ગાધ્યક્ષઃ સુરાધ્યક્ષો વેદાધ્યક્ષો વિચારકઃ ॥ ૫૭॥

ભર્ગોઽનર્ઘ્યો નરેશાનો નરવાહનસેવિતઃ ।
ચતુરો ભવિતા ભાવી ભાવદો ભવભીતિહા ॥ ૫૮॥

ભૂતેશો મહિતો રામો વિરામો રાત્રિવલ્લભઃ ।
મઙ્ગલો ધરણીપુત્રો ધન્યો બુદ્ધિવિવર્ધનઃ ॥ ૫૯॥

જયી જીવેશ્વરો જારો જાઠરો જહ્નુતાપનઃ ।
જહ્નુકન્યાધરઃ કલ્પો વત્સરો માસરૂપધૃત્ ॥ ૬૦ ॥

ઋતુરૃભુસુતાધ્યક્ષો વિહારી વિહગાધિપઃ ।
શુક્લામ્બરો નીલકણ્ઠઃ શુક્લો ભૃગુસુતો ભગઃ ॥ ૬૧ ॥

શાન્તઃ શિવપ્રદોઽભેદ્યોઽભેદકૃચ્છાન્તકૃત્ પતિઃ ।
નાથો દાન્તો ભિક્ષુરૂપી દાતૃશ્રેષ્ઠો વિશામ્પતિઃ ॥ ૬૨ ॥

કુમારઃ ક્રોધનઃ ક્રોધી વિરોધી વિગ્રહી રસઃ ।
નીરસઃ સરસઃ સિદ્ધો વૃષણી વૃષઘાતનઃ ॥ ૬૩ ॥

પઞ્ચાસ્યઃ ષણ્મુખશ્ચૈવ વિમુખઃ સુમુખીપ્રિયઃ ।
દુર્મુખો દુર્જયો દુઃખી સુખી સુખવિલાસદઃ ॥ ૬૪ ॥

પાત્રી પૌત્રી પવિત્રશ્ચ ભૂતાત્મા પૂતનાન્તકઃ ।
અક્ષરં પરમં તત્ત્વં બલવાન્ બલઘાતનઃ ॥ ૬૫ ॥

ભલ્લી ભૌલિર્ભવાભાવો ભાવાભાવવિમોચનઃ ।
નારાયણો મુક્તકેશો દિગ્દેવો ધર્મનાયકઃ ॥ ૬૬ ॥

કારામોક્ષપ્રદોઽજેયો મહાઙ્ગઃ સામગાયનઃ ।
તત્સઙ્ગમો નામકારી ચારી સ્મરનિષૂદનઃ ॥ ૬૭ ॥

કૃષ્ણઃ કૃષ્ણામ્બરઃ સ્તુત્યસ્તારાવર્ણસ્ત્રપાકુલઃ ।
ત્રપાવાન્ દુર્ગતિત્રાતા દુર્ગમો દુર્ગઘાતનઃ ॥ ૬૮ ॥

મહાપાદો વિપાદશ્ચ વિપદાં નાશકો નરઃ ।
મહાબાહુર્મહોરસ્કો મહાનન્દપ્રદાયકઃ ॥ ૬૯ ॥

મહાનેત્રો મહાદાતા નાનાશાસ્ત્રવિચક્ષણઃ ।
મહામૂર્ધા મહાદન્તો મહાકર્ણો મહોરગઃ ॥ ૭૦ ॥

મહાચક્ષુર્મહાનાસો મહાગ્રીવો દિગાલયઃ ।
દિગ્વાસા દિતિજેશાનો મુણ્ડી મુણ્ડાક્ષસૂત્રધૃત્ ॥ ૭૧ ॥

શ્મશાનનિલયોઽરાગી મહાકટિરનૂતનઃ ।
પુરાણપુરુષોઽપારઃ પરમાત્મા મહાકરઃ ॥ ૭૨ ॥

મહાલસ્યો મહાકેશો મહોષ્ઠો મોહનો વિરાટ્ ।
મહામુખો મહાજઙ્ઘો મણ્ડલી કુણ્ડલી નટઃ ॥ ૭૩ ॥

અસપત્નઃ પત્રકરઃ પાત્રહસ્તશ્ચ પાટવઃ ।
લાલસઃ સાલસઃ સાલઃ કલ્પવૃક્ષશ્ચ કમ્પિતઃ ॥ ૭૪॥

કમ્પહા કલ્પનાહારી મહાકેતુઃ કઠોરકઃ ।
અનલઃ પવનઃ પાઠઃ પીઠસ્થઃ પીઠરૂપકઃ ॥ ૭૫॥

પાટીનઃ કુલિશી પીનો મેરુધામા મહાગુણી ।
મહાતૂણીરસંયુક્તો દેવદાનવદર્પહા ॥ ૭૬॥

અથર્વશીર્ષઃ સોમ્યાસ્યઃ ઋક્સહસ્રામિતેક્ષણઃ ।
યજુઃસામમુખો ગુહ્યો યજુર્વેદવિચક્ષણઃ ॥ ૭૭॥

યાજ્ઞિકો યજ્ઞરૂપશ્ચ યજ્ઞજ્ઞો ધરણીપતિઃ । (યજ્ઞઘ્નો)
જઙ્ગમી ભઙ્ગદો ભાષાદક્ષોઽભિગમદર્શનઃ ॥ ૭૮॥

અગમ્યઃ સુગમઃ ખર્વઃ ખેટી ખટ્વાનનો નયઃ । (ખેટાનનો)
અમોઘાર્થઃ સિન્ધુપતિઃ સૈન્ધવઃ સાનુમધ્યગઃ ॥ ૭૯॥

પ્રતાપી પ્રજયી પ્રાતર્મધ્યાહ્નસાયમધ્વરઃ ।
ત્રિકાલજ્ઞઃ સુગણકઃ પુષ્કરસ્થઃ પરોપકૃત્ ॥ ૮૦॥

ઉપકર્તાપહર્તા ચ ઘૃણી રણજયપ્રદઃ ।
ધર્મી ચર્મામ્બરશ્ચારુરૂપશ્ચારુવિશોષણઃ ॥ ૮૧॥

નક્તઞ્ચરઃકાલવશી વશી વશિવરોઽવશઃ ।
વશ્યો વશ્યકરો ભસ્મશાયી ભસ્મવિલેપનઃ ॥ ૮૨॥

ભસ્માઙ્ગી મલિનાઙ્ગશ્ચ માલામણ્ડિતમૂર્ધજઃ ।
ગણકાર્યઃ કુલાચારઃ સર્વાચારઃ સખા સમઃ ॥ ૮૩॥

સુકુરો ગોત્રભિદ્ગોપ્તા ભીમરૂપો ભયાનકઃ । (મકરો)
અરુણશ્ચૈકચિન્ત્યશ્ચ ત્રિશઙ્કુઃ શઙ્કુધારણઃ ॥ ૮૪॥

આશ્રમી બ્રાહ્મણો વજ્રી ક્ષત્રિયઃ કાર્યહેતુકઃ ।
વૈશ્યઃ શૂદ્રઃ કપોતસ્થઃ ત્વષ્ટા તુષ્ટો રુષાકુલઃ ॥ ૮૫॥

રોગી રોગાપહઃ શૂરઃ કપિલઃ કપિનાયકઃ ।
પિનાકી ચાષ્ટમૂર્તિશ્ચ ક્ષિતિમાન્ ધૃતિમાંસ્તથા ॥ ૮૬॥

જલમૂર્તિર્વાયુમૂર્તિર્હુતાશઃ સોમમૂર્તિમાન્ ।

સૂર્યદેવો યજમાન આકાશઃ પરમેશ્વરઃ ॥ ૮૭॥

ભવહા ભવમૂર્તિશ્ચ ભૂતાત્મા ભૂતભાવનઃ ।
ભવઃ શર્વસ્તથા રુદ્રઃ પશુનાથશ્ચ શઙ્કરઃ ॥ ૮૮॥

ગિરિજો ગિરિજાનાથો ગિરીન્દ્રશ્ચ મહેશ્વરઃ ।
ગિરીશઃ ખણ્ડહસ્તશ્ચ મહાનુગ્રો ગણેશ્વરઃ ॥ ૮૯॥

ભીમઃ કપર્દી ભીતિજ્ઞઃ ખણ્ડપશ્ચણ્ડવિક્રમઃ ।
ખડ્ગભૃત્ ખણ્ડપરશુઃ કૃત્તિવાસા વિષાપહઃ ॥ ૯૦॥

કઙ્કાલઃ કલનાકારઃ શ્રીકણ્ઠો નીલલોહિતઃ ।
ગણેશ્વરો ગુણી નન્દી ધર્મરાજો દુરન્તકઃ ॥ ૯૧॥

ભૃઙ્ગીરિટિઃ રસાસારો દયાલૂ રૂપમણ્ડિતઃ ।
અમૃતઃ કાલરુદ્રશ્ચ કાલાગ્નિઃ શશિશેખરઃ ॥ ૯૨॥

સદ્યોજાતઃ સ્વર્ણમુઞ્જમેખલી દુર્નિમિત્તહૃત્ ।
દુઃસ્વપ્નહૃત્ પ્રસહનો ગુણિનાદપ્રતિષ્ઠિતઃ ॥ ૯૩॥

શુક્લસ્ત્રિશુક્લઃ સમ્પન્નઃ શુચિર્ભૂતનિષેવિતઃ ।
યજ્ઞરૂપો યજ્ઞમુખો યજમાનેષ્ટદઃ શુચિઃ ॥ ૯૪॥

ધૃતિમાન્ મતિમાન્ દક્ષો દક્ષયજ્ઞવિઘાતકઃ ।
નાગહારી ભસ્મધારી ભૂતિભૂષિતવિગ્રહઃ ॥ ૯૫॥

કપાલી કુણ્ડલી ભર્ગઃ ભક્તાર્તિભઞ્જનો વિભુઃ ।
વૃષધ્વજો વૃષારૂઢો ધર્મવૃષવિવર્ધકઃ ॥ ૯૬॥

મહાબલઃ સર્વતીર્થઃ સર્વલક્ષણલક્ષિતઃ ।
સહસ્રબાહુઃ સર્વાઙ્ગઃ શરણ્યઃ સર્વલોકકૃત્ ॥ ૯૭॥

પવિત્રસ્ત્રિકકુન્મન્ત્રઃ કનિષ્ઠઃ કૃષ્ણપિઙ્ગલઃ ।
બ્રહ્મદણ્ડવિનિર્માતા શતઘ્નીપાશશક્તિમાન્ ॥ ૯૮॥

પદ્મગર્ભો મહાગર્ભો બ્રહ્મગર્ભો જલોદ્ભવઃ ।
દેવાસુરવિનિર્માતા દેવાસુરપરાયણઃ ॥ ૯૯॥

દેવાસુરગુરુર્દેવો દેવાસુરનમસ્કૃતઃ ।
ગુહપ્રિયો ગણસેવ્યઃ પવિત્રઃ સર્વપાવનઃ ॥ ૧૦૦॥

લલાટાક્ષો વિશ્વદેવો દમનઃ શ્વેતપિઙ્ગલઃ ।
વિમુક્તિર્મુક્તિતેજસ્કો ભક્તાનાં પરમા ગતિઃ ॥ ૧૦૧॥

દેવાતિદેવો દેવર્ષિર્દેવાસુરવરપ્રદઃ ।
કૈલાસગિરિવાસી ચ હિમવદ્ગિરિસંશ્રયઃ ॥ ૧૦૨॥

નાથપૂજ્યઃ સિદ્ધનૃત્યો નવનાથસમર્ચિતઃ ।
કપર્દી કલ્પકૃદ્રુદ્રઃ સુમના ધર્મવત્સલઃ ॥ ૧૦૩॥

વૃષાકપિઃ કલ્પકર્તા નિયતાત્મા નિરાકુલઃ ।
નીલકણ્ઠો ધનાધ્યક્ષો નાથઃ પ્રમથનાયકઃ ॥ ૧૦૪॥

અનાદિરન્તરહિતો ભૂતિદો ભૂતિવિગ્રહઃ ।
સેનાકલ્પો મહાકલ્પો યોગો યુગકરો હરિઃ ॥ ૧૦૫॥

યુગરૂપો મહારૂપો મહાગીતો મહાગુણઃ ।
વિસર્ગો લિઙ્ગરૂપશ્ચ પવિત્રઃ પાપનાશનઃ ॥ ૧૦૬॥

ઈડ્યો મહેશ્વરઃ શમ્ભુર્દેવસિંહો નરર્ષભઃ ।
વિબુધોઽગ્રવરઃ સૂક્ષ્મઃ સર્વદેવસ્તપોમયઃ ॥ ૧૦૭॥

સુયુક્તઃ શોભનો વજ્રી દેવાનાં પ્રભવોઽવ્યયઃ ।
ગુહઃ કાન્તો નિજસર્ગઃ પવિત્રઃ સર્વપાવનઃ ॥ ૧૦૮॥

શૃઙ્ગી શૃઙ્ગપ્રિયો બભ્રૂ રાજરાજો નિરામયઃ ।
દેવાસુરગણાધ્યક્ષો નિયમેન્દ્રિયવર્ધનઃ ॥ ૧૦૯॥

ત્રિપુરાન્તક શ્રીકણ્ઠસ્ત્રિનેત્રઃ પઞ્ચવક્ત્રકઃ । (ઈશાનસ્ત્રિનેત્રઃ)
કાલહૃત્ કેવલાત્મા ચ ઋગ્યજુઃસામવેદવાન્ ॥ ૧૧૦॥

ઈશાનઃ સર્વભૂતાનામીશ્વરઃ સર્વરક્ષસામ્ ।
બ્રહ્મણોઽધિપતિર્બ્રહ્મ બ્રહ્મણોઽધિપતિસ્તથા ॥ ૧૧૧॥

બ્રહ્મા શિવઃ સદાનન્દી સદાનન્દઃ સદાશિવઃ ।
મેષસ્વરૂપશ્ચાર્વઙ્ગો ગાયત્રીરૂપધારણઃ ॥ ૧૧૨॥

અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરાય ચ ।
સર્વતઃ સર્વસર્વેભ્યો નમસ્તે રુદ્રરૂપિણે ॥ ૧૧૩॥

વામદેવસ્તથા જ્યેષ્ઠઃ શ્રેષ્ઠઃ કાલકરાલકઃ ।
મહાકાલો ભૈરવેશો વેશી કલવિકારણઃ ॥ ૧૧૪॥

બલવિકારણો બાલો બલપ્રમથનસ્તથા ।
સર્વભૂતાદિદમનો દેવદેવો મનોન્મનઃ ॥ ૧૧૫ ॥

સદ્યોજાતં પ્રપદ્યામિ સદ્યોજાતાય વૈ નમઃ ।
ભવે ભવે નાતિભવે ભવસ્વ માં ભવોદ્ભવ ॥ ૧૧૬ ॥

ભાવનો ભવનો ભાવ્યો બલકારી પરં પદમ્ ।
પરઃ શિવઃ પરો ધ્યેયઃ પરં જ્ઞાનં પરાત્પરઃ ॥ ૧૧૭ ॥

પરાવરઃ પલાશી ચ માંસાશી વૈષ્ણવોત્તમઃ ।
ૐ ઐં હ્રીં શ્રીં હ્સૌઃ દેવો ૐ શ્રીં હૌં ભૈરવોત્તમઃ ॥ ૧૧૮ ॥

ૐ હ્રાં નમઃ શિવાયેતિ મન્ત્રો વટુવરાયુધઃ ।
ૐ હ્રીં સદાશિવઃ ૐ હ્રીં આપદુદ્ધારણો મનુઃ ॥ ૧૧૯ ॥

ૐ હ્રીં મહાકરાલાસ્યઃ ૐ હ્રીં બટુકભૈરવઃ ।
ભગવાંસ્ત્ર્યમ્બક ૐ હ્રીં ૐ હ્રીં ચન્દ્રાર્ધશેખરઃ ॥ ૧૨૦ ॥

ૐ હ્રીં સં જટિલો ધૂમ્રો ૐ હ્રીં ત્રિપુરઘાતકઃ ।
હ્રાં હ્રીં હ્રૂં હરિવામાઙ્ગ ૐ હ્રીં હ્રૂં હ્રીં ત્રિલોચનઃ ॥ ૧૨૧ ॥

ૐ વેદરૂપો વેદજ્ઞ ઋગ્યજુઃસામમૂર્તિમાન્ ।
રુદ્રો ઘોરરવોઽઘોરો ૐ ક્ષ્મ્યૂં અઘોરભૈરવઃ ॥ ૧૨૨ ॥

ઓંજું સઃ પીયૂષસક્તોઽમૃતાધ્યક્ષોઽમૃતાલસઃ ।
ૐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ॥ ૧૨૩ ॥

ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય માઽમૃતાત્ ।
ૐ હૌં જૂં સઃ ૐભૂર્ભુવઃ સ્વઃ ૐજૂંસઃ મૃત્યુઞ્જયઃ ।
(પાતુ માં સર્વદેવેશો મૃત્યુઞ્જયઃ સદાશિવઃ ॥ ૧૨૪ ॥)

ઇદં નામ્નાં સહસ્રં તુ રહસ્યં પરમાદ્ભુતમ્ ।
સર્વસ્વં નાકિનાં દેવિ જન્તૂનાં ભુવિ કા કથા ॥ ૧૨૫ ॥

તવ ભક્ત્યા મયાઽઽખ્યાતં ત્રિષુ લોકેષુ દુર્લભમ્ ।
ગોપ્યં સહસ્રનામેદં સાક્ષાદમૃતરૂપકમ્ ॥ ૧૨૬ ॥

યઃ પઠેત્ પાઠયેદ્વાપિ શ્રાવયેચ્છૃણુયાત્ તથા ।
મૃત્યુઞ્જયસ્ય દેવસ્ય ફલં તસ્ય શિવે શ◌ૃણુ ॥ ૧૨૭ ॥

લક્ષ્મ્યા કૃષ્ણો ધિયા જીવો પ્રતાપેન દિવાકરઃ ।
તેજસા વહ્નિદેવસ્તુ કવિત્વે ચૈવ ભાર્ગવઃ ॥ ૧૨૮॥

શૌર્યેણ હરિસઙ્કાશો નીત્યં દ્રુહિણસન્નિભઃ ।
ઈશ્વરત્વેન દેવેશિ મત્સમઃ કિમતઃપરમ્ ॥ ૧૨૯॥

યઃ પઠેદર્ધરાત્રે ચ સાધકો ધૈર્યસંયુતઃ ।
પઠેત્ સહસ્રનામેદં સિદ્ધિમાપ્નોતિ સાધકઃ ॥ ૧૩૦॥

ચતુષ્પથે ચૈકલિઙ્ગે મરુદેશે વનેઽજને ।
શ્મશાને પ્રાન્તરે દુર્ગે પાઠાત્ સિદ્ધિર્ન સંશયઃ ॥ ૧૩૧॥

નૌકાયાં ચૌરસઙ્ઘે ચ સઙ્કટે પ્રાણસઙ્ક્ષયે ।
યત્ર યત્ર ભયે પ્રાપ્તે વિષવહ્નિભયાદિષુ ॥ ૧૩૨॥

પઠેત્ સહસ્રનામાશુ મુચ્યતે નાત્ર સંશયઃ ।
ભૌમાવસ્યાં નિશીથે ચ ગત્વા પ્રેતાલયં સુધીઃ ॥ ૧૩૩॥

પઠિત્વા સ ભવેદ્દેવિ સાક્ષાદિન્દ્રોઽર્ચિતઃ સુરૈઃ ।
શનૌ દર્શદિને દેવિ નિશાયાં સરિતસ્તટે ॥ ૧૩૪॥

પઠેન્નામસહસ્રં વૈ જપેદષ્ટોત્તરં શતમ્ ।
સુદર્શનો ભવેદાશુ મૃત્યુઞ્જયપ્રસાદતઃ ॥ ૧૩૫॥

દિગમ્બરો મુક્તકેશઃ સાધકો દશધા પઠેત્ ।
ઇહ લોકે ભવેદ્રાજા પરે મુક્તિર્ભવિષ્યતિ ॥ ૧૩૬॥

ઇદં રહસ્યં પરમં ભક્ત્યા તવ મયોદિતમ્ ।
મન્ત્રગર્ભં મનુમયં ન ચાખ્યેયં દુરાત્મને ॥ ૧૩૭॥

નો દદ્યાત્ પરશિષ્યેભ્યઃ પુત્રેભ્યોઽપિ વિશેષતઃ ।
રહસ્યં મમ સર્વસ્વં ગોપ્યં ગુપ્તતરં કલૌ ॥ ૧૩૮॥

ષણ્મુખસ્યાપિ નો વાચ્યં ગોપનીયં તથાત્મનઃ ।
દુર્જનાદ્રક્ષણીયં ચ પઠનીયમહર્નિશમ્ ॥ ૧૩૯॥

શ્રોતવ્યં સાધકમુખાદ્રક્ષણીયં સ્વપુત્રવત્ ।

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીદેવીરહસ્યે
મૃત્યુઞ્જયસહસ્રનામં સમ્પૂર્ણમ્ ॥

Verses 93-109 are not found in some of the books in print

Encoded by Ravin Bhalekar

Proofread by Ravin Bhalekar, PSA Easwaran

---

*Mrityunjaya Sahasranama Stotram*

pdf was typeset on March 7, 2021

Please send corrections to *sanskrit@cheerful.com*